यथाः स्मृत" इत्युपक्रम्य । "उच्चावचानि भूतानि गात्रेभ्यस्तस्य जज्ञिरे । आपवस्य प्रजासर्गं सृजतो हि प्रजापतेः" स सृष्ट्वा तु प्रजास्त्वेवमापवो वै प्रजापतिः" इति च हरिवं० १,२अ० ।

**आपस्** न० आप–असुन् । जले । "आपोभिर्मार्ज्जनं कृत्वा" स्मृतिः । "अन्नमयं हि सौम्य ! मन आपोमयः प्राणस्तेजोमयी वाक्" छा०उप० "सर्वमापोमयं जगत्" देवीमा० । "ब्रुवते कतमेऽपि नपुंसकमाप" इति वृत्तिरष्टतकोषात् क्लीवत्वम् । तदभावे ह्रस्वः अप इत्येव । तट् पक्षे अप्स इत्यपि । कर्मणि ।

**आपस्तम्ब** पु० ऋषिभेदे स च कल्पसूत्रकारः धर्म्मशास्त्रकर्त्ता च"यमापस्तम्बसंवर्त्ताः कात्यायनबृहस्पती" इत्याद्यभिधाय "धर्म्मशास्त्रप्रयोजकाः" या० स्मृ०। तदीय संहिताच दशाध्यायी तस्यां प्रायश्चित्तविधानमात्रमुक्तम् ।तस्यापत्यम् विदा० अञ् आपस्तवः तदपत्ये पुंस्त्री स्त्रियां ङीप् । आपस्तम्बस्येदम् छ । आपस्तम्बीयः । तत्सम्बन्धिनि त्रि० आपस्तवेन प्रोक्तमधीयते अण् तस्य लुक् । आपस्तम्बप्रोक्तशाखाध्येतृषु ब०व० । आपस्तम्ब्यां भवः ढक्। आपस्तम्बेयः । आपस्तम्बापत्यस्त्रीभवे त्रि० ।

**आपस्तम्भिनी** पु०आपः स्तम्नानि स्तम्भ–णिनि । लिङ्गिन्यां लतायाम् ।

**आपाक** पु०समन्तात् परिवेष्ट्य पच्यतेऽत्र आ+पच–आधारे घञ् । १कुम्भकारस्य मृण्मयपात्रपचनस्थाने (पोयान) । भावे घञ्। २ईषत्पाके ३सम्यक्पाके ४पुटपाके च ।

**आपाङ्ग्य** न० अपाङ्गे देयम् ष्यञ् । अपाङ्गे देये अञ्जने । "शलाकया दक्षिणेन क्षिपेत्कानीनमञ्जनम् । आपाङ्ग्यं वा यथायोग्यं कुर्याच्चात गतागतम्" सुश्रु० ।

**आपात** पु० हठात् अविवेकात् कारणान्तरसाचिव्याभावेऽपि आगत्य पातः । अविविच्यावगतौ "आपाततोयदर्थस्य पौनरुक्त्यावभासनम्"सा०द०२अतर्कितागमने । "गरुड़ापातविश्लिष्टमेघनादास्त्रबन्धनः" रघुः । "तदापातभयात् पथि"कुमा० आपतत्यत्राधारे घञ् । ३तत्काले वर्त्तमानकाले"आपातरम्या विषयाः पर्य्यन्तपरितापिनः"किरा० "आपातरम्यास्तत्कालरमणीयाः" मल्लि० । ४उपक्रमे च "मध्वापातोविषास्वादः स धर्मप्रतिरूपकः" मनुः । "मध्वापातो मधुरोपक्रमः"कुल्लू० ।

**आपातलिका** स्त्री वृत्तर० उक्ते मात्राभेदे "कथितेयं भात् गुरुकावथ पूर्व्वमन्यत्" तल्लक्षणं अन्यत् वैतालीयगतम् तच्च "षड़्विषमेऽष्टौ समे कलास्तास्तु समे स्युर्नोनिरन्तराः । न समात परान्विता कला"इत्येव प्रथमं निवेश्यान्ते जगणं दत्त्वा गुरुद्वयं चतुर्षु चरणेषु देयमित्यर्थः ।

**आपाततस्** अव्य० आपात+तसिल् । १कारणं विनेत्यर्थे २अकस्मादित्यर्थे ३अनवधार्य्येत्यर्थे च । "एतच्चापाततः" जगदी०"आपाततो यदर्थस्येति" सा०द० ।

**आपात्य** त्रि० आपतति स्वयमाक्रमितुमागच्छति । "भव्यगेयेत्यादि" पा०नि० कर्त्तरि ण्यत् । १स्वयमाक्रमितुमागामिनि । "आपात्यसैनिकनिराकरणाकुलेन" माघः । भावे ण्यत् । २कर्तव्यापतने ३कर्मणि ण्यत् । आपात्ये देशादौ त्रि० आ+पत–णिच् ल्यप् । ४समन्तात्पातयित्वेत्यर्थे अव्य० ।

**आपाद** पु० आ+पद– घञ् । फललाभे "ध्यानापादांशा इव" ह०उ० "ध्यानस्यापादनमापादः ध्यानफललाभः" इति भा० २आगतौ च पादपर्य्यन्तम् अव्ययी० । ३पादपर्य्यन्ते अव्य० ।

**आपादन** न० न० आ+पद–णिच्–ल्युट् । १आपत्तिविषयीकरणे आपादकज्ञानेन आपाद्यनिश्चये" पद–भावे णिच्–ल्युट् । २सम्पादने "द्रव्यस्य संख्यान्तरापादने" सि० कौ० ।

**आपान** न० आपीयते सम्भूय सुरा पीयतेऽत्र आधारे ल्युट् । सुरापानाय सम्भूयोपवेशनस्थाने । पानार्थसभायाम् (चक्र) "गन्धर्व्वाप्सरसोभद्रे ! मामापानगतं सदा" भा०व०प०२८०अ० । "आपाने पानकलिता दैवेनाभिप्रणोदिताः" ददर्श यदुवीराणामापाने वैशसं महत्" इति च भा०आ०प० २अ० । भावे ल्युट् । २सम्भूय सुरापाणे । "ताम्बूलीनां दलैस्तत्र रचितापानभूमयः" रघुः । "यत्र स्फटिकहर्म्येषु नक्तमापानभूमिषु" कुमा० । स्वार्थे कन् । आपानकमप्यपि पानगोष्ठ्याम् । सुरापाणे च "आपानकमुत्सवः !" काद० । [कर्त्तरि स्त्रियां ङीप् ।

**आपायिन्** त्रि० आपिबति आ+पा–णिनि । सुरापाणे

**आपालि** पु० आ+पा–क्विप् तदर्थमलति अल–इन् । केशकीटे (उकुन्) सहि शीर्षस्थरुधिरापानप्रसक्तः

**आपि** पु० आप+णिच्–इन् । १धनादिप्रापके । "इये देवा यूयमिदापयः" ऋ०२,२९,४। "आपयः धनस्य प्रापयितारः" भा० । आप्यते कर्म्मणि इन् । २आप्ते बन्धौ तस्य भावः आपित्वं बन्धुत्वे "आपित्वे नः प्रपित्वे" ऋ०८,७,३ । "आपित्वे बन्धुत्वे" भा० ।